CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 582

Title Sanyāsa prayoga

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 532 Subject: Dharma śāstra

Title: Sanyāsa prayoga

Author: Rudradeva Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 9.5" by 4.2" Extent: 28 foll.

Language: Sanskrit Script: Devanāgarī

Remarks: Begins and Ends abruptly.

त्वा गुरोराज्ञां च लब्ध्वा उदगयने आदौ प्रशस्ते काले संन्यासमारभेत। कस्यांचिद्रिक्तायां तिथौ ह
त माध्याह्निकः सायाह्नं गां वा देशकालौ संकीर्त्य अमुकशर्मणो मम करिष्यमाणसंन्यासे यो
ग्यतासिध्यर्थं चतुः कृच्छ्रात्मकं प्रायश्चित्तं प्रतिकृच्छ्रमेकैकगोनिष्क्रयद्रव्यद्वाराहमाचरिष्ये
इति संकल्प्य। कृच्छ्रप्रत्याम्नायगोनिष्क्रयद्रव्यं ब्राह्मणेभ्यो दातुमहमुत्सृज्ये इति संकल्पपूर्वकं
ब्राह्मणेभ्यो दद्यात्। एकादश्यां द्वादश्यां वा ब्रह्मराज्ञिये याभवति तथा श्राद्धान्यारभेत। तत्र सं
न्यासे अधिकारार्थं स्वस्य नवश्राद्धषोडशश्राद्धानि च साग्निकः पार्वणविधिना निरग्निकस्त्व
कोद्दिष्टविधिना कुर्यात्। सपिंडीकरणमपि केषांचिन्मते नोक्तं तत्कर्तव्यं चिकीर्षायां तदपि
कार्यं। एषां नवश्राद्धादीनां प्रयोगस्तु ब्रह्मानंदीयपद्धतौ ज्ञेयः। केचित्तु नवश्राद्धादेः सपिंडीक
रणस्य च नावश्यकं। अच्युताश्रमीयपद्धतावनुक्तत्वादस्वारस्याभावाच्च। अथाष्ट श्राद्धप्रयोगः। त

प्र॰

२ आपस्तंबयजमानकर्तृकेऽग्नौकरणहोममंत्रेऊहस्यासंभवात्पिंडदानेविकल्पदर्शनात्सौम
त्यविधिरेवावतिष्ठते। आश्वलायनानांतुस्वाहाकारेणवाग्निपूर्वंयज्ञोपवीतीत्यग्नौकरणेवि
धिराम्नानात्पिंडदानेविकल्पदर्शनात्पार्वणविधिरेव। तत्रापस्तंबानांप्रयोगः। श्राद्धपाको
दन्येनान्नेनवैश्वदेवंकृत्वाततोनद्यादौगत्वाप्राङ्मुखोयज्ञोपवीतीयवसहितजलेनश्राद्ध
देवतानांतर्पणमादौकुर्यात्। तर्पणप्रकारस्तु। ब्रह्माणंतर्पयामि। विष्णुंत॰। महेश्वरंत॰। देव
र्षींस्त॰। ब्रह्मर्षींस्त॰। क्षत्रियर्षींस्त॰। वसूंस्त॰। रुद्रांस्त॰। आदित्यांस्त॰। सनकंत॰। सनंदनंत॰। सना
तनंत॰। पृथिव्यादीनिपंचमहाभूतानित॰। एकादशचक्षुरादीनिकरणानित॰। चतुर्विधंभूत
ग्रामंत॰। पितरंत॰। पितामहंत॰। प्रपितामहंत॰। मातरंत॰। पितामहींत॰। प्रपितामहींत॰। आत्मानंत॰।
पितरंत॰। पितामहंत॰। इतितर्पणंविधायगृहमागत्यदेशकालौसंकीर्त्यामुकोऽहंदुःखनिवृत्ति १२९

तीयमासिकंत्रैपक्षिकंचकुर्यात्। तथाचस्मर्यते। अर्वाक्त्रिपक्षाद्यच्छ्राद्धंनद्दाहादेवमृते मा॰
त। ऊर्ध्वंत्रिपक्षाद्यच्छ्राद्धं। मृताहन्येवतद्भवेदिति। तथासाग्निकस्यसपिंडीकरणमपिक
र्त्तुरनाहिताग्नेश्चेत्त्रिपक्षएवकार्यं। तदुक्तंनिर्णयसिंधौ[illegible]ना। प्रेतश्चेदाहिताग्निः
स्यात्कर्त्तानाग्निर्यदाभवेत्। सपिंडीकरणंतस्यकुर्यात्पक्षेतृतीयकइति। तत्रत्रिपक्षेक
र्त्तुर्जन्मदिनंजन्मनक्षत्रंत्रिपादपंचकानक्षत्रादिनंत्रिपुष्करादियोगादिनंवर्जयित्वाकार्यं।
कालबाहुल्यात्। द्योतकारेणतुईदृशेपिविशेषेद्वादशाहएवसपिंडीकरणस्यकालोब्रा
ह्मणस्य। वृद्धमनुः। द्वादशेऽह्निविप्राणामाशौचांतेतुभूभुजां। वैश्यानांतुत्रिपक्षादा
वथ[illegible]स्यात्सपिंडनमिति। त्रिपक्षस्तुवैश्यपरइतिव्याख्यातं। अत्रयथाचारंव्यवस्था।
उभयसाधारणत्वेतुद्वादशाहएव। तदुक्तंलघुहारीतेन। साग्निकस्तुयदाकर्त्ताप्रेतोवाप्य
ति

२ ग्निमान्न भवेत्। दूराद्गत्वाहे तदा कार्यं सपिंडीकरणं पितुरिति। एकादशाहे दर्शश्चेत्तदा एकादशाहे
पि सपिंडीकरणं कार्यं। तदुक्तं कार्ष्णाजिनिना। सपिंडीकरणं कुर्यात्पूर्ववद्याग्निमान् सुतः। परतो
दशरात्राच्चेत्कु दूरस्थोपरीतन इति। आहिताग्नेस्तेन विना श्रौतपिंडपितृयज्ञासिद्धेरित्यर्थः। इत्थं
श्रौताग्निविषये उपयोगी विनिर्णयः। अकारितोरोरुद्रेण नृसिंहस्तेन लुप्यतां। इति संस्कार
प्रकाशे। इति श्री प्रयोगे श्रौताग्निविषये उपयोगी निर्णयः॥ ॥अथ संन्यासकर्तुः प्रतिसंन्या
सो ब्रह्मानंदीयं पद्धत्यनुसारेण प्रयोगमात्रमुच्यते। तत्रादावौपासनाग्निमंतं यजमानं प्रतिलो
५९ दशविधुरं प्रति च प्रयोगः। तत्रादौ निःस्पृहः सर्वतः शांत इत्यादिलक्षणैर्युक्तो मुमुक्षुर्गुरुं संश्रि
ध्यतान्तिकटे वर्षमेकं षण्मासं त्रिमासं मासं वा वसन् यतिधर्मान् संवीक्ष्य तत्सर्वैर्जगत्सज
नूनिषिद्धप्रतिग्रहनिवृत्तो गायत्रीजपरुद्राध्यायजपकूष्मांडहोमरूपपुरश्चरणमादौ कृ २

निरतिशयानंदप्राप्तिपरमपुरुषार्थप्राप्तये करिष्यमाणपरमहंससंन्यासस्वीकारार्थं त
दंगत्वेनाष्टौ श्राद्धानि सदेवानि सांकल्पविधिनाऽन्नेन आमद्रव्येण वा तंत्रेण करिष्ये इति सं
कल्प्यास्य वसुसंज्ञका विश्वेदेवा नांदीमुखाः स्थाने क्षणः कर्तव्यः। इत्येकं चैवात तथैव द्वि
तीयं वृणुयात्। एवं सर्वत्र। प्रथमे देवश्राद्धे ब्रह्मविष्णुमहेश्वरा नांदीमुखाः स्थाने क्ष॰ १ एवं द्वि
तीये। द्वितीये ऋषिश्राद्धे देवर्षिब्रह्मर्षिक्षत्रर्षयो नांदीमुखाः स्थाने क्ष॰ २ तृतीये दिव्यश्राद्धे
वसुरुद्रादित्या नांदीमुखाः स्थाने क्ष॰ २ चतुर्थे मनुष्यश्राद्धे सनकसनंदनसनातना नांदी
मुखाः स्थाने क्ष॰ २ पंचमे भूतश्राद्धे पृथिव्यादीनि पंचमहाभूतानि एकादश चक्षुरादीनि
करणानि चतुर्विधो भूतग्रामो नांदीमुखाः स्थाने क्ष॰ २ षष्ठे पितृश्राद्धे पितृपितामहप्रपि
तामहा नांदीमुखाः स्थाने॰ २ सप्तमे मातृश्राद्धे मातृपितामहीप्रपितामह्यो नांदीमुखाः स्था॰

प्र
३

अष्टमे आत्मश्राद्धे आत्मपितृपितामहा नांदीमुखाः स्थाने॰२ इत्यष्टादश ब्राह्मणान्निमंत्र्य तेषां
पादान्प्रक्षाल्य यथापूर्वं प्राङ्मुखानुदङ्मुखांस्थानुपवेश्य प्रार्थयेत् ॥ संन्यासार्थमहं श्राद्धं कुर्वे
ऽतद्विजोत्तमाः । अनुज्ञां प्राप्य युष्माकं सिद्धिं प्राप्स्यामि शाश्वतीं ॥ गर्भवासभयाद्भीतस्तथाता
पत्रयादिति ॥ गुहां प्रवेष्टुमिच्छामि परं पदमनामयं ॥ ॐ कुशोसीति द्विजैरुक्ते कर्त्ता सर्वत्र द्विजक
रेषु पोदत्वा कुशं दूर्वा युग्मयवसहितं गृहीत्वा सत्यवसुसंज्ञका विश्वेदेवा नांदीमुखाः इदमा
सनं सुखासनं ॥ इति विप्रदक्षिणभागे आसनं दत्वा । एवं द्वितीये विप्रे । ततो ब्रह्माद्यष्टपा
र्वणार्थमुपविष्टेषोडशब्राह्मणेष्वप्येवमेवासनादि दद्यात् । यथा । ब्रह्मविष्णुमहेश्वरा नां
दीमुखा इदमासनं॰२ देवर्षिब्रह्मर्षिक्षत्रर्षयो नांदीमुखा इदं॰२ । वसुरुद्रादित्या नांदीमुखा
इदं॰२ सनकसनंदनसनातना नां॰२ पृथिव्यादीनि पंचमहाभूतानि एकादशचक्षुरादीनि

श्रापक्ष॰२

करणानि चतुर्विधो भूतग्रामो नां॰२ पितृपितामहप्रपितामहा नां॰२ मातृपितामहीप्रपिता
मह्यो नां॰ स्वा इदं॰२ आत्मपितृपिता महप्रपित महा नां॰२ इति सर्वत्रासनं दत्वा पश्चात्स
त्यवसुसंज्ञका विश्वेदेवा नांदीमुखा एष गंधः स्वाहा न मम २ ब्रह्मविष्णुमहेश्वरा नां॰२ देवर्षि
ब्रह्मर्षिक्षत्रर्षयो नां॰२ वसुरुद्रादित्या नां॰२ सनकसनंदनसनातना नां॰२ पृथिव्यादीनि
पंचमहाभूतानि एकादशचक्षुरादीनि करणानि चतुर्विधो भूतग्रामो नां॰२ पितृपितामहप्र
पितामहा नां॰२ मातृपितामहीप्रपितामह्यो नांदीमुखा एष॰२ आत्मपितृपिता महप्रपितृ
महा नां॰२ इति कनिष्ठिकया द्विर्द्विर्गंधं दत्वा ऽपो दद्यात् । एवं चैतेन पुष्पधूपदीपाच्छादनानि
दद्यात् । इमानि पुष्पाणि स्वा॰ । एष धूपः स्वा॰२ । एष दीपः स्वा॰२ इदमाच्छादनं निष्क्रयद्रव्यं स्वाहा
नममेति । ततो द्विजाग्रे भोजनभाजनानि निधायोपस्तीर्यान्नादि परिविष्य तदभावे आमं तन्नि

प्र०

४ क्षय्यद्रव्यं वा निधाय गायत्र्या प्रोक्ष्य पृथिवी ते इत्यभिमन्त्र्य। सत्यवसुसंज्ञका विश्वेदेवा नान्दी
मुखा इदमन्नं आमं तन्निष्क्रयद्रव्यं वा यथाशक्ति सोपस्करं स्वाहा हव्यं न मम इति सर्वत्र यथादे
वतमन्नत्यागं कुर्यात्। ततः प्रजापते न त्व० रयीणां। अनेन नान्दीमुखा देवादयः प्रीयन्तामिति वि
देत्। ततो विप्रा बलिदानवर्जं भुंजीयुः। तेषु उपास्मै पंच। अक्षन्नमीमदन्तेति च श्रावयि
त्वा संपन्नमिति सर्वत्र पृष्टे सर्वैः रुचिरमिति न देयुः। नेदमामादेत। तत आचान्तेषु विप्रेषु तांबू
ल दक्षिणात्वेन द्राक्षामलक निष्क्रयद्रव्यं दातुमहमुत्सृज्ये इति संकल्पपूर्वकं दत्वा उपसंप
न्नमिति ब्राह्मणान्विसृज्य न दातार इति वरयाचनं। ब्राह्मणान्प्रदक्षिणीकृत्य प्रार्थयेत्। उत्था
य च ततो विप्रान् हृष्टपुष्टेन चेतसा। प्रदक्षिणां ततः कृत्वा नमस्कृत्य द्विजोत्तमान्। क्षंतव्यमि
ति तान्ब्रूयात्प्रणम्य शिरसा ततः। संन्यासार्थं मया श्राद्धं कृतमेतद्द्विजोत्तमाः। अनुज्ञां प्राप्य १३१

५३६ युष्माकं सिद्धिं प्राप्स्यामि शाश्वतीं। गर्भजन्मजराभीतः संतापत्रययुतस्तथा। गुहां प्रवेष्टुमिच्छा
मि परं पदमनामयमिति प्रार्थ्य नमस्कृत्य यत्कृतं कर्मेश्वरार्पणं कुर्यात्। यस्य स्मृत्येत्यस्य काचि
सुस्मरणेन द्विराचामेदिति। इति नान्दीश्राद्धवद्दृष्टादृष्टब्राह्मणसाध्यसंबंधनामगोत्ररूप
वर्जं प्रथमं विभक्त्यैव संक्षेपरीत्या। ऽथ श्राद्धप्रयोगः। आश्वलायनकर्तृके यजमाने संकल्पे पा४
पार्वणविधिना अन्नेन आमेन वा करिष्ये इति विशेषः। पूर्ववत्क्षणं दत्वा आसनमपि दत्वा
ब्राह्मणाग्रे प्रागग्रदर्भोपरि विश्वेदेवार्थमर्घ्यपात्रमेकमेव पार्वणार्थमष्टौ एवं नवपात्रा
णि प्राक्संस्थानि निधाय सर्वपात्रेषु द्विपत्रकुशपवित्रौ निहितेषु अप आसिच्य शन्नोदेवीति स
कृत्स्नमनुमंत्र्य प्रथमे वैश्वदेवार्घ्यपात्रे यवोसीति यवानोप्य द्वितीयादिषु तिलोसीति सोमदे
न प्रतिपात्रमंत्रमावर्त्तयन्यवानोप्य गंधपुष्पाणि तूष्णीं दद्यात्। ऊहप्रकारस्तु यवोसि

प्र॰
५ सोमदेवत्यो गोसर्वैर्देवनिर्मितः। प्रत्नवद्भिः प्रत्तः पुष्ट्या नांदीमुखान्देवान्प्रीणयाहि नः स्वाहेति
प्रथमपार्वणपात्रे। द्वितीये यवोसीत्यादिनां नांदीमुखानृषीन्प्रीणयाहि नः स्वाहेति यवावपनं। तृ
तीयेनांदीमुखान्दिव्यान्प्रीणयाहि नः स्वाहेति। चतुर्थे नांदीमुखान्मनुष्यान्प्रीणयाहि नः स्वा
हेति। पंचमे नांदीमुखानि भूतानि प्रीणयाहि नः स्वाहेति। षष्ठे नांदीमुखान्पितॄन्प्रीणया
हि नः स्वाहेति। एवं सप्तमाष्टमयोर्यथास्थितः पितृशब्दः। ततः प्रतियुग्ममेकैकमर्घ्यपात्रं स्वा
हार्घ्या इत्यादयानि वेद्य सर्वत्रापो दत्वा प्रथमदैवद्विजकरे अर्घ्यपात्रोपरिस्थपवित्रं निधाय
पात्रांतरेणार्घ्यपात्रस्थजलमर्घं गृहीत्वा या दिव्या इति मंत्रेण सत्यवसुसंज्ञका विश्वेदेवा नां
दीमुखा इदमर्घ्यं स्वाहा न मम। इत्यर्घ्यं दत्वा ततोऽवशिष्टमर्घ्यस्थितमर्घजलेन द्वितीयदे
करे१ वद्विजे पूर्ववद्दत्वा। एवमेवोत्तरत्रार्घ्यपात्रं द्विधा विभज्य प्रति पार्वणे निमंत्रितविप्रद्वयेदद्या

त्। दानप्रकारस्तु। ब्रह्मविष्णुमहेश्वरा नांदीमुखा इदं वोऽर्घ्यं स्वाहा न मम। विप्रहस्तात्प्रस्रव
आपो ऽनुमंत्रयते। या दिव्या आपः पयसा॰ भवंतु। अपो दत्वा। एवं द्वितीये देवर्षिब्रह्मर्षिक्षत्रर्ष
योनां॰ तु॰ २ वसुरुद्रादित्या नांदीमु॰ तु॰ ३ सनकसनंदनसनातना नां॰ तु॰ ४ पृथिव्यादीनि पंच
महाभूतानि एकादशाक्षचक्षुरादीनि करणानि चतुर्विधो भूतग्रामो नां॰ तु॰ ५ पितृपितामहप्र
पितामहा नां॰ तु॰ ६ मातृपितामहिप्रपितामह्यो नां॰ तु॰ ७ आत्मपितृपिता [illegible]पिता महा नां॰
तु॰ ८ सर्वत्रार्घ्यं दत्त्वेत त्पात्रं न्युब्जीकृत्य पूर्वोक्तरीत्या गंधाद्याच्छादनरसानां ते भोजनपात्राण्या
साद्य। अग्नौकरणार्थमन्नमादाय घृताक्तं कृत्वा आमपक्षे तंडुलान्वा गृहीत्वाऽवदानसंपत्या
वृदायै अग्नये कव्यवाहनाय स्वाहा। सोमाय पितृमते स्वाहा। इति मंत्राभ्यां वैश्वदेविकाग्नि
प्रोविहाया ऽवशिष्टं षोडशांशं ब्राह्मणकरेषु हुत्वा मधुरद्रव्याण्यन्नानि परिविष्य आमपक्षे आ

प्र०

६ मंतत्रिश्रयद्रव्यं वा ऽन्नादद्यापात्रेषु निधाय। पूर्वी कृत्वा रुचिरामितिविदेयुः ॥ नेदमामारौ इत्युक्तं
हुत्वा आचांतेषु द्विजेषु हूर्वाय वल्लज दधि बदरी फलयुत मन्नेन आमपक्षे सत्तुना वा पिंडदा
नं कुर्वीत। यथा। गोमयापलिप्तभूमौ अपहता इति मंत्रावृत्त्या दक्षिणारंभाः प्रागायता उदक्संस्था
अष्टरेखाः कृत्वा ता अभ्युक्ष्य। सर्वासु प्रागग्रान्कुशानास्तीर्य दूर्वा नास्तीर्य तासु रेखासु दक्षि
णरेखामारभ्य प्रतिरेखां पिंडत्रयार्थं स्थलत्रये प्राक्संस्थं शुंधंतामित्यादि मंत्रैर्जलं सिंचे
त्। मंत्राश्च। शुंधंतां ब्रह्मणो नांदीमुखाः। शुंधंतां विश्वेदेवा नांदीमुखाः। शुंधंतां महेश्वरा नांदीमुखाः। तदुत्तररेखा
यां। शुंधंतां देवर्षयो नां०। शुंधंतां ब्रह्मर्षयो नां०। शुंधंतां क्षत्रर्षयो नां०। तृतीयरेखायां। शुंधंतां
वसवो नां०। शुंधंतां रुद्रा नां०। शुंधंतामादित्या नां०। चतुर्थरेखायां। शुंधंतां सनका नां०। शुंधंतां
सनंदना नां०। शुंधंतां सनातना नां०। पंचमे। शुंधंतां पृथिव्यादीनि पंचमहाभूतानि नांदीमुखा १३२

प्र०

निः। शुंधंतामेकादश चक्षुरादीनि करणानि नांदीमुखानि। शुंधंतां चतुर्विधभूतग्रामा नां०।
षष्ठे। शुंधंतां पितरो नां०। शुंधंतां पितामहा नां०। शुंधंतां प्रपितामहा नां०। सप्तमे। शुंधंतां
मातरो नां०। शुंधंतां पितामह्यो नां०। शुंधंतां प्रपितामह्यो नां०। अष्टमे। शुंधंतां मातामहा नां०।
शुंधंतां प्रमातामहा नां०। शुंधंतां वृद्धप्रमातामहा नांदीमुखाः। इति सर्वत्र जलं निनीय। पूर्वोक्तद्रव्ये
ण षट्त्रिंशत्पिंडान्कृत्वा तत्तद्रेखासु कृतजलसेकस्थले एकैकस्यै देवतायै पिंडद्वयं
दद्यात्। प्रतिपिंडं मंत्रावृत्तिरिति नारायणवृत्तिकारः। मतांतरे तु द्वितीयस्तूष्णीमिति। पिं
डदानमंत्रास्तु। नांदीमुखाय ब्रह्मणे स्वाहा। तदुत्तरतः पूर्ववत् द्वितीयः। एवं सर्वत्र नांदी
मुखाय विष्णवे स्वाहा। नांदीमुखाय महेश्वराय स्वाहा। द्वितीयरेखायां देवर्षिभ्यो नां
दीमुखेभ्यः स्वाहा। ब्रह्मर्षिभ्यो नां०। क्षत्रर्षिभ्यो नां०। तृतीयरेखायां। वसुभ्यो नां०।

स्याप्तनुमंत्रणादि सर्वं कृतात्कृतं॥
पिंडानांधादिनासंप्रज्य नमस्क
सोपसंपन्न नि५

प्र०

७ रुद्रेभ्यो नां०न०॥ आदित्येभ्यो नां०न०॥ चतुर्थरेखायां॥ सनकायनां०न०॥ सनंदनायनां०न०॥ सनात
नायनां०न०॥ पंचमरेखायां॥ पृथिव्यादिपंचमहाभूतेभ्यो नां०न०॥ एकादशचक्षुरादिकरणेभ्यो
छन३ नां०न०॥ चतुर्विधायभूतग्रामायनां०न०॥ षष्ठरेखायां॥ पित्रेनां०न०॥ पितामहायनां०न०॥ प्रपिताम
हायनां०न०॥ सप्तमरेखामात्रेनांदीमुखायै०न०॥ पितामह्येनां०न०॥ प्रपितामह्येनां०न०॥ अष्टमरे-
आत्मनेनां०न०॥ पित्रेनां०न०॥ पितामहायनां०न०॥ अत्रपितरोमादयध्वमितिविसृज्य ब्राह्मणे
भ्यः पूर्ववद्दक्षिणादानादि सर्वं कुर्यादिति॥ एवमष्टश्राद्धोत्तरंब्रह्मराज्यनुरोधेन तस्मिं
दिने द्वितीये वा शिखार्थं मूर्ध्नि पंच षट् केशान् रक्षापयित्वा कक्षोपस्थवर्जं केशश्मश्रुलोमा
नि२ दीनां वपनं विधाय नखानि कृत्य यथाविधि स्नात्वा कौपीनाछादनाद्युपयुक्तं स्वात्मन
आचार्याय दक्षिणार्थं होमार्थं च द्रव्यं पृथक् कृत्वा सति विभवे पुत्रदाराश्रितादिभ्योध

नादि विभज्य संतर्प्य स्वीयं धनं संन्यास दातृभ्यो विप्रेभ्यो यतिभ्यश्च विभज्य तदाद्युपाशे
षं सर्वमर्थिभ्यो दद्यात्॥ असति विभवे स्वात्मानमेव तेभ्यो निवेदयेत्॥ अथ देवागारे ऽ
ग्न्यागारे नदीतीरे गोष्ठे ऽरण्ये वा शुचौ देशे स्वकौपीनादिविवर्णं कृत्वा वेणवं सकल्माषं
ग्रंथियुक्तं योनिरहितं मदग्धं सत्वचं शिरः प्रमाणं ललाटांतं भ्रूप्रमाणं वा दंडमकेशाम
स्थूलं समक्लोत्पाटितं विप्रानीतं समपर्वं ग्रंथियुक्तं समुद्रकं संपाद्य शंखोदकेनाष्टोत्त
रशतं १०८ प्रणवेन पुरुषसूक्तेन च केशवादिनाममंत्रैरभिषिच्य संस्थाप्य॥ स्मृत्यर्थसारे॥
दंडं जलपवित्रं च शिक्यं पात्रकेमंडलुं॥ आसनं कौपीनमाछादनं कंथां पादुके इति दृशाय
षिं जलपवित्रं च शिक्यं पात्रं कमंडलुमिति पंच वा संस्थाप्योपविश्य उदगयनादावेकाद
श्यां द्वादश्यां वा॥ आतुरश्चेत्कस्मिंश्चित्काले वा देशकालौ स्मृत्वा परमहंसादि संन्यासग्रहणं

१ संन्यासदीपिकायां मंगिरा:॥ चातुर्मास्यं परित्यज्य रिक्तां नष्टां च वर्जयेत्॥ वर्जयेदष्टमीं पूर्णां संन्यासं कारयेद्बुधः॥१॥ क्षेपकः॥

२ शौनकः॥ दक्षिणजानुन्यधिउत्तानं वामहस्तं कृत्वा तत्र द्वे पवित्रे निधाय तदुपरि उत्तानेन दक्षिणहस्तेन पिदध्यादिति
ब्रह्मांजलिं कुर्यात्॥ इति विश्वेश्वर्यां॥

प्र०

८ करिष्ये इति संकल्प्य तदंगत्वेन विहितमादौ गणेशपूजन पुण्याहवाचन मातृकापूजन नां
दीश्राद्धानि करिष्ये इति संकल्प्य। तानि कृत्वा॥ आचम्य प्राणानायम्य ब्रह्मांजलिं विधाय मन
साजपेत्॥ ॐ ब्रह्मणे नमः॥ ॐ विष्णवे नमः॥ ॐ रुद्राय नमः॥ ॐ सूर्याय नमः॥ ॐ सोमाय
नमः॥ ॐ आत्मने नमः॥ ॐ अंतरात्मने नमः॥ ॐ परमात्मने नमः॥ इत्युच्चार्य वेदादीन्जपि
त्वा सक्तुमुष्टित्रयं प्रणवेन त्रिः प्राश्याचम्य नाभौ करं दत्वा मंत्रयेदेभिर्मंत्रैः॥ ॐ आत्म
ने स्वाहा॥ ॐ अंतरात्मने स्वाहा॥ ॐ परमात्मने स्वाहा॥ ॐ प्रजापतये स्वाहा॥ इति॥ ततः
पयो दधि घृतमाज्यमपो वा त्रिवृदसीति प्रथमं॥ प्रवृदसीति द्वितीयं॥ विवृदसीति तृती
यं॥ प्राश्य आपः पुनंत्विति जलं प्राश्याचम्योपविश्य। ततउपवासं करिष्यामीति संकल्प
येत्॥ ततः सावित्रीं प्रविशेत्॥ ॐ भूः सावित्रीं प्रविशामि। तत्सवितुर्वरेण्यं॥ ॐ भुवः सा० १२५

भर्गो देवस्य धीमहि॥ ॐ स्वः सा० धियो यो नः प्रचोदयात्॥ ॐ भूर्भुवः स्वः सावित्रीं प्र० तत्स
वितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्॥ इति जपित्वा किंचन न प्राश्नी
यात्॥ ततोऽस्तमयात्प्राग्गोपासनाग्निं समिध्य विछिन्नश्चेत्पुनः संधानमग्नित्याग प्राय
श्चित्तहोमद्रव्यदानपूर्वकं कुर्यात्॥ अनाहिताग्निर्विधुरेण पृष्ठोदिवि विधानेनाग्निमु
त्पादनीयः स यथा॥ आचम्य प्राणानायम्य देशकालौ स्मृत्वा ब्रह्मान्वाधानाय यथा विधुर
कल्पोक्तविधुराग्निमुत्पादयिष्ये इति संकल्प्य स्थंडिले लेखासुल्लिख्य व्याहृतिभिः प्रण
वेन च श्रोत्रियागारादग्निमाहृत्य॥ अग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवे डि२
दाः॥ अनु सूर्यस्य पुरुत्रा च रश्मीननु द्यावापृथिवी आततान॥ इति मंत्रेण स्थंडिले [illegible]
ग्नेय्यां दिशि निधाय॥ पृष्ठो दिवि पृष्ठो अग्निः पृथिव्यां पृष्ठो विश्वा ओषधीराविवे

प्र०

९ शां वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा स रिषः पातु नक्तं ॥ इति मंत्रेण स्थंडिले बौले सुप्रतिष्ठा
पते नैव काष्ठैः समिध्य परिसमूह्य ॥ तत्सवितुर्वे० यात् स्वाहा ॥ सवित्र इदं ॥ तां सवितुर्वरेण्यस्य
चित्रामाहं वृणे सुमतिं विश्वजन्याम् ॥ यामस्य कण्वो अदुहत्प्रपीनां सहस्रधारां पयसा महीं गा
ं स्वाहा ॥ सवित्र इदं ॥ विश्वानि देव सवितर्दुरितानि परा सुव ॥ यद्भद्रं तन्न आ सुव स्वाहा ॥ स
वित्र इदं ॥ इति तिस्रः समिधो ऽभ्याधाय पुनः परिसमूह्य ॥ यस्य स्मृत्येत्यादि ॥ एवमग्निं सिद्धं
कृत्वा विधुराग्निसमिंधनं कुर्यात् ॥ ततो ब्रह्मान्वाधानं ॥ अस्तमानात्पूर्वं प्राणानायम्य देशे
कालौ संकीर्त्य परमहंससंन्यासं कर्तुं तत्र विहितं ब्रह्मान्वाधानं करिष्ये इति संकल्प्य ॥ अग्नी
धनाद्याज्यसंस्कारांतं कृत्वा स्रुक्स्रुवौ संमृज्याग्निं परिषिंच्य स्रुचि चतुर्गृहीतं गृहीत्वा ॥ ॐ स्वा
हेति हुत्वा ॥ परमात्मन इदं ॥ उत्तरपरिषेचनं कृत्वा ॥ यस्य स्मृत्येत्यादि ॥ एतद्ब्रह्मान्वाधानं ॥ ततः

संध्यावंदनपूर्वकमस्तमित आदित्ये स्वस्वाग्नौ नित्यहोमं वैश्वदेवं च कुर्यात् ॥ अथ सायं
१२ होमानंतरमुत्तरेणाग्निं तृणानि संस्तीर्य तेषु दंडादि शिक्यादीनि पंच वा द्वंद्वशः आसा
द्य दक्षिणाग्निं कुशेषु कृष्णाजिनमास्तीर्य तस्मिन्नुपविश्य गायत्रीजपं जागरणं कुर्यात् ॥
ततो ब्राह्मे मुहूर्ते उत्थाय यथाविधि स्नात्वा प्रातःसंध्या प्रातर्होमं वैश्वदेवादिकं कृत्वा प्राणा
नायम्य व्याहृतीर्जपित्वा आग्नेयस्थालीपाकं कुर्यात् ॥ तत्र प्रयोगः ॥ देशकालौ संकीर्त्य पर
महंससंन्यासं करिष्यमाणो ऽमुकशर्माहं पूर्वांगत्वेन विहितमाग्नेयस्थालीपाकं करिष्ये
इति संकल्प्य ॥ इध्माबर्हिषी सन्नोपत्यवहं तिचरुं श्रपयित्वेत्यादि पार्वणस्थालीपाक
वत्सर्वं कुर्यात् ॥ आश्वलायनकर्तृके यजमाने संकल्पं कृत्वा चेत्वौरिश्यं गेत्यग्निं ध्यात्वा
न्वादध्यात् ॥ अस्मिन्नन्वाहिते ऽग्नावित्यादि चक्षुषी आज्येनेत्यंतमुक्त्वा प्रधानदेवतामग्निं

यथा॥ तरत्समंदी धावति धारा सुतस्यांधसः॥ तरत्समंदी धावति॥ उस्रा वेद वसूनां मर्त्तस्य देव्यवसः॥ त
रत्समंदी धावति॥ ध्वस्रयोः पुरुषंत्योरा सहस्राणि दद्महे॥ तरत्समंदी धावति॥ आ ययोस्त्रिंशतं तना सहस्
प्र· स्राणि च दद्महे॥ तरत्समंदी धावति॥ १॥ ७०४
१० चरुद्रव्येण शेषेण स्यादि पूर्णपात्रनिधानांते सपवित्रे शूर्पे ऽग्नये त्वा जुष्टं निर्वपामीति त्रि
तुरो मुष्टीन्निरूप्य तथैव प्रोक्ष्येत्याघाराज्यभागांते प्रधानहोमे अग्नये स्वाहेति हुत्वा यदस्य
निस्विष्टकृतं कुशाग्रे शेषं स्थालीपाकवत्कुर्यादिति। ततो भस्मधृत्वैश्वदेवस्य पस्पृष्ट्वा तरत्समंदी धावती
तिसूक्तमप्सु जपेत्। विप्रान्संभोज्य कर्न्नेणः पुण्याहं वाचयित्वा हेमरूप्य कुशपुत जले स्नात्वा।
देशकालौ संकीर्त्य संसर्गदोषेन विहितं प्राणादिहोमपूर्वकं पुरुषसूक्तहोमं तत्पादिनयो
ग्यसंपादनार्थमुपपातकादि सकलपापनिरसनपूर्वकं सावयवशुद्ध्यर्थं च विरजाहोमं च तंत्रे
ण करिष्य इति संकल्प्य गृह्याग्निं संस्थाप्य विंशद्देवताहोमपर्याप्तं तंडुलानां पल्यवह
तीसादि पार्वणवदग्निमुखांते प्रधानहोमं कुर्यात्। अथाश्वलायन कर्तृके ऽन्वाधानं कुर्या
त्। चक्षुषी आज्येनेत्यंते प्राणादि पंचदेवतानारायणं पुरुषसूक्तेन प्रत्यृचं षोडशवारं प्रा १३७

णाद्येकोनविंशति देवता विरजामंत्रैः प्रतिद्रव्यमेकैकसंख्याकाभिः समिद्वर्ज्यैः प्रजापति
मेकवारमाज्येन शेषेण स्विष्टकृतमित्यादि पूर्णपात्रनिधानांते मध्ये तत्र शतवारं तूष्णीं नि
रूप्य तथैव प्रोक्ष्याघारादि कृत्वा अग्निं पर्यग्निकृत्वा आज्यभागांते प्रधानाहुतीर्जुहुयादिति
विशेषः। ॐ प्राणाय स्वाहा। प्राणायेदं०। ॐ अपानाय स्वाहा। अपानायेदं०। ॐ व्यानाय स्वा
हा। व्यानायेदं०। ॐ उदानाय स्वाहा। उदानायेदं०। ॐ समानाय स्वाहा। समानायेदं०। ५। ॐ
सहस्रशीर्षा० गुलं स्वाहा। १। नारायणायेदं न ममेति सर्वत्र। ॐ पुरुष एवेदं० इति स्वाहा। २
एतावानस्य० दिवि स्वाहा। ३। त्रिपादूर्ध्व० अभि स्वाहा। ४। तस्माद्विरा० पुरः स्वाहा। ५। यत्पु
रुषेण० हविः स्वाहा। ६। तं यज्ञं० ऋषयश्च ये स्वाहा। ७। तस्माद्यज्ञा० संभृतं० ग्राम्याश्च ये स्वाहा। ८।
तस्माद्यज्ञा० ऋचः सा० यत स्वाहा। ९। तस्मादश्वा० वयः स्वाहा। १०। यत्पुरुषं व्य० च्येते

प्र०
११

स्वाहा।११।ब्राह्मणोस्य० यतस्वाहा।१२।चंद्रमामन० यतस्वाहा।१३।नाभ्यात्रासी० त्यपन्स्वा
हा।१४।सप्तास्यास० पुरुषस्वाहा।१५।यज्ञेन० देवा स्वाहा।१६।प्राणापानव्यानोदानसमा
नामेशुध्यंतांज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा।१।प्राणादिभ्य इदं०।वाङ्मन
श्चक्षुःश्रोत्रजिह्वाघ्राणरेतोबुध्याकूतिसंकल्पामेशुध्यंतां० स्वाहा।वागादिभ्य इदं०।२
त्वक्चर्ममांससरुधिरमेदोमज्जास्नायवास्थीनिमेशुध्यंतां०हा।त्वगादिभ्य इदं०।३।
शिरःपाणिपादपार्श्वपृष्ठोरूदरजंघाशिश्नोपस्थपायवोमेशुं०हा।शिरादिभ्य इदं०।४।
उत्तिष्ठपुरुषहरितपिंगललोहिताक्षिदेहिदेहिददापयितामेशुं०हा।पुरुषादिभ्य इ
दं०।५।पृथिव्यापस्तेजोवायुराकाशामेशुं०हा।पृथिव्यादिभ्य इदं०।६।शब्दस्प
र्शरूपरसगंधामेशुं०हा।शब्दादिभ्य इदं०।७।मनोवाक्कायकर्माणिमेशुं०हा।मना

दिभ्य इदं०।८।अव्यक्तभावैरहंकारैर्ज्योति० हा।अव्यक्तादिभ्य इदं०।९।आत्मामेशु० हा।आ
त्मन इदं०।१०।अंतरात्मामेशु०हा।अंतरात्मन इदं०।११।परमात्मामेशु०हा।परमात्मन इदं०।१२।क्षु
धे स्वाहा।क्षुध इदं०।१३।क्षुत्पिपासाय स्वाहा।क्षुत्पिपासायेदं०।१४।विविट्यै स्वाहा।विविट्या इ
१५।ऋग्विधानाय स्वाहा।ऋग्विधानायेदं०।१६।कषोत्काय स्वाहा।कषोत्कायेदं०।१७।क्षुत्पि
पासामलं ज्येष्ठामलक्ष्मीर्नाशयाम्यहं।अभूतिमसमृद्धिं च सर्वान्निर्णुद मे पाप्मानं स्वा
हा।क्षुत्पिपासादिभ्य इदं०।१८।अन्नमयप्राणमयमनोमयविज्ञानमयमानंदमयमात्मामे
शुध्यंतां० हा।अन्नादिभ्य इदं०।१९।इति समिच्चर्वाज्यैः प्रतिमंत्रं चत्वारिंशदाहुतीर्हुत्वा।अग्ने
नमंत्रेण।स्विष्टं हुनेत्।यदिदं यच्च पूर्तं यच्चापघनापरि।प्रजापतेतोतन्मनसि जुहोमि विमुक्तो
हं देवकिल्बिषात्स्वाहा।प्रजापतय इदं०।ततः पुरुषसूक्तं जपेत्।विरादीन्जपित्वा वरोरेकदेश

प्र०

१२ तः स्विष्टकृतं हुत्वा समिधमिध्मसन्नहनं चाग्नौ प्रहृत्य नजयादयोस्याःपरिधीनन्तःपात्र प्र
युक्तदर्भाग्राणि इत्यादि देवतासंकीर्त्तने अग्निः सोमः अग्निः प्राणादि पंच देवताः पुरुषसूक्त
मंत्रोक्तदेवताः प्राणाद्येकोनविंशतिः अग्निः स्विष्टकृत् ॥ निरूपयत्येत्यादि ब्रह्मविसर्जनान्तं
कृत्वा ब्राह्मणे हिरण्यमाज्यपात्रं मधुपूर्णं कांस्यपात्रं धेनुं च दत्त्वा विसर्जयेत् ॥ ततआचार्याय
पूर्वोद्दिष्टभागं धेनुं वस्त्राणि सुवर्णादि दत्त्वा क्षमाप्योपासनाग्नेरुपस्थानं कुर्यात् ॥ ॐ सं मा
सिंचंतु मरुतः समिंद्रः संबृहस्पतिः ॥ संमायमग्निः सिंचत्वायुषा च बलेन चायुष्मंतं करोतु
मा इत्यग्निमुपस्थाय तस्मिन्नग्नौ पात्रद्वाहं कृत्वा तेजसा निरुरवेक्ष्यात् ॥ ततआत्मसमारो
पः कर्त्तव्यः ॥ अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः ॥ तं जानन्नग्न आरोहाथा नो वर्धया
गिरः ॥ या ते अग्ने यज्ञिया तनूस्तयेह्यारोहात्मात्मानं ॥ अच्छा वसूनि कृण्वन्नस्मे नर्या पुरूणि ॥ १३९

यज्ञो भूत्वा यज्ञमासीद स्वां योनिं ॥ जातवेदो भुव आजायमानः सक्षय एहि ॥ इति कृत्वा यजुषा
च त्रिरावर्त्तेनात्मन्यग्निं समारोपयेत् ॥ अग्ने ज्वीलां प्राश्नीयात् ॥ हस्तौ प्रक्षाल्याचम्य ॥ ॐ एष
ग्ने सहेष्टापूर्त्तेः शरीरमनुसंचरस्व ॥ नाहं त्वामपहाय परागां मा त्वं मामपहाय परागाः इत्यग्निं वि
सृज्य ततः कुसोजिनमादायोत्तरनारायणेन गृहान्निष्क्रमेत् ॥ ततः स्वेभ्यः पुत्रेभ्य आशिषं दद्यात् ॥
सर्वे भवंतु वेदाढ्याः सर्वे भवंतु सोमपाः ॥ सर्वे पुत्रमुखं दृष्ट्वा सर्वे भवंतु भिक्षुकाः ॥ १ ॥ पश्चात्पिता
यं पुत्रं प्रति कथयति ॥ त्वं ब्रह्म त्वं यज्ञस्त्वं लोकस्त्वं सर्वमिति ब्रूयात् ॥ स पुत्रः पितरं प्रत्याह ॥ अ
हं ब्रह्माहं यज्ञोहं लोकोहं सर्वमिति ॥ यद्यपुत्रः अहं ब्रह्माहं यज्ञोहं सर्वमिति स्वयमेव जपेत् ॥ शि
वं स्वस्त्यस्तु सर्वेभ्यः ॥ तथा च बह्वृचपरिशिष्टे ॥ अथ पुत्रांस्तु हृदो बंधून्प्रत्याह ॥ न मे कश्चिन्ना
६३ हं कस्यचिदस्तीति ॥ अथ बंधुविसर्जनं ॥ शृण्वंतु सर्वे श्रीगुरुप्रसादात्संसारस्य पारमहं ग

प्र०

१३ तुकामोऽस्मि।मयासर्वैषांममतात्यक्ता।पुत्रैषणावित्तैषणालोकैषणाचत्यक्ता।युष्माभिर्मम
परिममतानकर्तव्या।विघ्नानविधेयः।ततोजलाशयंगत्वांऽजलिनाजलमादायप्रतिरथेनाऽ
वै० शुःशिशानइतिसूक्तेनाभिमंत्र्य।ॐसर्वाभ्योदेवताभ्यःस्वाहा।इतिसंजेत्।तिथ्यादिस्मरण
पूर्वकंस्नानंविधाय।अपरोक्षब्रह्मज्ञानायसंन्यासंकरोमीतिसंकल्प्य।अपांपूर्णांजलिंगृ
हीत्वा।ॐएषहवाअग्निःसूर्यःप्राणंगच्छस्वाहा।ॐस्वांयोनिंगच्छस्वाहा।ॐअपोवैगच्छस्वाहा।
इतिमंत्रत्रयेणजलेअंजलित्रयंदद्यात्।ततःपुत्रैषणावित्तैषणालोकैषणासर्वैषणामयापरि
त्यक्ताः।अभयंसर्वभूतेभ्यःस्वाहा।इत्यपांपूर्णांजलिंजलेक्षिपेत्।पश्चात्सर्वंब्रह्मेतिचिंत
येत्।नान्यत्।पुनरप्यभयंदत्वाब्रह्मांजलिंकृत्वापठेत्।यत्किंचिद्बंधकंकर्मकृतमज्ञानतोमया।
प्रमादालस्यदोषाद्यत्तत्सर्वंसंत्यजाम्यहं।यत्तत्सर्वंविशुद्धात्मागतस्नेहःशुभाशुभः।काम

भोगादिकंसर्वंत्यक्त्वैवमुदाहरेत्।एवंत्यक्ष्याम्यहंसर्वंकामभोगसुखादिकं।रोषंतोषंविवादंच
गंधमाल्यानुलेपनं।भूषणंनर्त्तनंगेयंदानमादानमेवच।नमस्कारंजपंहोमंयाश्चनित्याःक्रि
यामम।नित्यंनैमित्तिकंकाम्यंवर्णधर्माश्रमाश्रया।गुणधर्माश्रयेकेचिच्छुभाऽशुभफलानि
चाकरणंकार्यकर्तृत्वंकर्त्तारंकरणैःसह।सर्वमेवपरित्यज्यबुध्यातिष्ठतिमानसः।चतुर्विधस्य
सन्नात्माभूतग्रामस्यनिस्पृहः।कृतंचैवक्षिप्तंचैववांछितंचानुमोदितं।संचिंत्यसर्वभूतेभ्यो
दद्यादभयदक्षिणां।पद्भ्यांकराभ्यांविहरन्नाहंवाक्कायमानसैः।करिष्येप्राणिनांपीडांप्राणिनः
संतुनिर्भयाः।देहेजलेवसेद्रुमोस्थावराजंगमाश्रये।लोमवस्त्रादिधान्येषुशयनेष्वासनेषु
ये।तेस्वपंतुविबुध्यंतुसुखंनोभयंविना।दत्वैवंसर्वभूतेभ्यःसर्वेभ्योऽभयदक्षिणां।करुणा
मैत्रवृत्तिश्चप्रज्ञोदर्शीचसंस्थितः।ततोविचिंतयेद्धीमान्सर्वमात्मनिसंस्थितं।कोऽस्तिमेकश्च

प्र॰

९४ मेनास्तिशुद्धएकोहममच्युतः॥ संसारादिस्यतन्नोति विद्युष्टोदेहमानसे। ब्रह्मज्ञानांबुशीते
नसिंचमांवाक्यवारिणा॥ नमेस्तिबांधवःकश्चिन्मुक्तात्मानंपरावरं। ममात्मेवपरोबंधुरूर्ध्वी
धःपृष्ठतोग्रतः। इंद्रियैर्विषयैःसर्वमध्याद्यंतर्बहिस्थितः। विश्वेश्वरोहमात्मावैसर्वज्ञःसर्व
तोमुखः॥ सत्त्वभीरभयंदत्त्वासर्वज्ञमजमीश्वरं। व्यक्ताव्यक्तेपरंशुद्धंसत्यंनिश्चित्यतत्त्वतः।
५२ १६। एतान्मेषान्नुवन्मुद्रादिशश्चैवावलोकयन्। प्रार्थयेच्च। आदित्यचंद्रावनलोनिलश्चद्यौ
र्भूमिरापोहृदयंमनश्च। अहश्चरात्रिश्चउभेचसंध्येधर्मोहिजानातिनरस्यवृत्तं। आदित्य
चंद्रादीन्सर्वान्देवान्कर्मसाक्षिणोनिखिलान् गुर्वादीन्ब्राह्मणान्संन्याससाक्षित्वेनध्याये
त्। ततोनाभिप्रमाणंजलेप्रविश्यप्राङ्मुखःसन्गायत्रींप्रविशामीतिसंकल्प्य। ॐभूःसा
वित्रींप्रविशामि। तत्सवितुर्वरेण्यं। ॐभुवःसावित्रींप्र०। भर्गोदेवस्यधीमहि। ॐस्वःसावि १४१

त्रींप्र०। धियोयोनःप्रचोदयात्। ॐभूर्भुवःस्वःसावित्रींप्र०। सर्वांगायत्रींजपेत्। ॐपरोरजसेसा
वदों। इतिजपित्वा। आचम्यप्रणवमेयमात्मानंध्यात्वाजलेस्थितः। ॐतरत्समंदीधावती। त्य
क्तेतुष्टयंजपित्वा। आदित्यमुपतिष्ठते। पुत्रेषणायाश्चवित्तेषणायाश्चलोकेषणायाश्चव्यु
त्थितोहंभिक्षाचर्यंचरामीत्येकापाणिनाप्सु आपोहुताप्रेषोच्चारंकुर्यात्। तदुक्तंबह्वृचप
रिशिष्टे। ॐभूःसन्यस्तंमया॥ ॐभुवःसन्यस्तंमया॥ ॐस्वःसन्यस्तंमया॥ इतित्रिर्मंद्रमध्य
मोत्तमस्वरेण॥ ॐअभयंसर्वभूतेभ्योमत्तःस्वाहा॥ इतिप्राच्यांदिश्यपांपूर्णांजलिंक्षि
पेत्। ततःशिखार्थीस्थापितकेशान्नुत्पाट्ययज्ञोपवीतमप्युद्धृत्यहस्तेगृहीत्वा। वेदांतविज्ञान
सुनिश्चितार्थाःसंन्यासयोगाद्यतयःशुद्धसत्त्वाः। तेब्रह्मलोकेतुपरांतकालेपरामृतात्परि
मुच्यंतिसर्वे। इतिमंत्रेणसंमर्घ्यएकीकृत्यकेशान्यज्ञोपवीतंचप्रक्षाल्य। ॐआपोवैसर्वादेवताः

त्राहि मां सर्वलोकेश गतिरन्या न विद्यते ॥ संन्यस्तं मे जग
न्नाथ पाहि मां मधुसूदन ॥ ३

प्र

१५ सर्वाभ्यो देवताभ्यो जुहोमि स्वाहा ॥ ॐ भूः स्वाहा ॥ इत्यप्सु जलेः सह जुहुयात् ॥ ततो विष्णुप्रार्थना ॥ प्र
कारमाह यमः ॥ दत्त्वा तोयांजलिं विप्रो भक्त्या संप्रार्थयेद्धरिं ॥ सर्वदेवात्मके तोये तोयाहुतिमहंक्र
रादत्त्वा सर्वैषणांस्त्यक्त्वा युष्मच्छरणमागतः ॥ त्राहि मां सर्वलोकेश वासुदेव सनातन ॥ संन्यस्तं मे
जगद्योने पुंडरीकाक्ष मोक्षद ॥ अहं सर्वाभयं दत्त्वा भूतानां परमेश्वर ॥ युष्मच्छरणमापन्नस्त्राहि
मां पुरुषोत्तम ॥ ततो जलात्तेउदङ्मुखः सन्वस्त्रैस्त्यक्तो यथाजातरूपधरो दिगंबरो भूत्वा बहिर्भू
मावुदङ्मुखः पंच वा सप्त वा पदानि गच्छेत् ॥ जिज्ञासुं प्रति आचार्यो दंडवस्त्राणि पत्ये अतित्रि
पर्ववैने लौकिकव्यवहारार्थं लज्जानिवारणार्थं वासोयुग्मं लोकोपकारधर्मशिक्षार्थं दंडयु
कं करोति ॥ ततः स्वयं कौपीनं काषायवासः स्वीकृत्य परिधायाचम्य दंडप्रार्थनां कुर्यात् ॥ ॐ वा
त्रैघ्नं शर्म मे भव यत्पापं तन्निवारय ॥ विष्णुहस्ते यथा चक्रं शूलं शिवकरे यथा ॥ इंद्रहस्ते यथा व

ज्रं तथा दंड भव बाधमे ॥ इति दंडं संप्रार्थ्य ॥ ॐ इंद्रस्य वज्रोऽसि सखा मां गोपाय ॥ इत्यनेन मंत्रेण
दंडग्रहणं कुर्यात् ॥ प्रणवेन कमंडलुं गृहीत्वा ॥ ततो यावद्गुरुसमीपे गमनं तावद्विष्णुस्मरण
परो भवेत् ॥ ततो दंडकमंडलुवस्त्रयुक्तः समित्पाणिर्गुरुसमीपं गत्वा नमस्कारं विधाय गुरु
उपसेनेनोपविश्य करसंपुटं कृत्वा गुरुप्रार्थनां कुर्यात् ॥ श्रीगुरो भगवन्नस्माद्घोरात्समुद्रद्र भ
सकृद्भ्रमे जन्मजरामरणाद्यपारसंसारादात्मज्ञानेन मां तारय ॥ भूतानामभयं दत्त्वा युष्मच्छर
णमागतः ॥ त्राहि मां योगिनामीश नान्यत्राताऽस्ति मे प्रभो ॥ निस्पृहः सर्वतः शांतः सर्वविद्यावि
शारदः ॥ सर्वसंशयसंछेत्ताऽनलसो गुरुराड्यः ॥ त्रायस्व भो जगन्नाथ गुरो संसारवह्निना ॥
दग्धं मां कालदष्टं च त्वामहं शरणं गतः ॥ अद्यप्रभृति भूतानि न हिंस्यामि कदाचन ॥ महाव्रतं च
रिष्यामि कर्मणा मनसा गिरा ॥ अविद्याकालसर्पेण दष्टं तद्विषपीडितं ॥ तद्वाक्यामृतपानेन सं

प्र०

१६ जीवय पुनर्मृतं॥ इति गुरुं प्रार्थ्य॥ दक्षिणं जानुं भूमौ नीत्वा पादग्रहणं कृत्वा॥ यो ब्रह्माणं विदधाति
पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये॥ इति
मंत्रेण गुरुं भगवद्बुध्योपस्थाय तदनंतरं संसाराग्निनिविष्टदेहमानसं ब्रह्मज्ञानाबुझीतं
नष्टं च मां वाक्यवारिणा॥ न मेऽस्ति बांधवः कश्चित् मुक्तात्मानं परावरं। ममात्मैव परो बंधुरूर्ध्वा
धः पृष्ठतोऽग्रतः॥ अधीहि भगवो ब्रह्मेति ब्रूयात्॥ तस्मै साधनचतुष्टयसंपन्नायाधिकारिणे
ब्रह्मचारिणे गुरुर्ब्रह्मोपदिशेत्॥ ततो गुरुरद्वैतं सच्चिदानंददेवरूपात्मानमेवानुसंधाय ज
लपूर्णशंखपुष्पादिभिरभ्यर्च्य द्वादशप्रणवैरभिमंत्र्य तेनोदकेन प्रणवेन शिष्यशिरो
ऽभिषिंचेत्॥ ततः शन्नो मित्र इत्यादि प्रथमशांतिं त्रिवारं पठित्वा शिरसि हस्तं दत्त्वा पुरुषसू
क्तं जपेत्॥ ततो दक्षिणकक्षोत्तरेण हस्तं शिष्यहृदये निधाय। मम व्रते हृदयं ते दधामि मम १४२

चित्तमनुचित्तं ते अस्तु। मम वाचमेकव्रतो जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यं॥ इति दीक्षां द
द्यात्॥ तत उदङ्मुखाय नित्यसत्यशुद्धबुद्धपरमानंदाद्वयब्रह्मप्रतिपादकं प्रणवं दक्षिणक
र्णे प्राङ्मुखः सन्नुपदिशेत्॥ प्रणवस्यार्थं आचार्यवचनेन बोधयेत्॥ ॐ पंचीकृतपंचमहा
भूतेत्यादिना॥ ततः अयमात्मा ब्रह्म॥ तत्त्वमसि॥ अहं ब्रह्मास्मि॥ प्रज्ञानं ब्रह्मेत्यादीनि शिष्यश्रा
वो वाक्योपदेशपूर्वकमुपदिशति। एषामर्थं च बोधयेत्॥ ततो नाम दद्यात्॥ वेसव मासनाम।
अथवा यद्वा चेतं तत्र तीर्थाश्रमसंप्रदाये॥ आनंदब्रह्म अद्वैतब्रह्मेत्यादि वनारण्ये॥ आनंदः
अद्वयानंदः॥ पूर्णानंद इत्यादि गिरिपर्वतसागरेषु॥ चैतन्यं राघवचैतन्य केशवचैतन्यादि॥
सरस्वतीभारतीपुरीषु॥ वासुदेवस्वरूप। नारायणस्वरूपेत्यादि नामानि पूर्वं कुर्यात्॥ ततो
गुरुः शिष्याय परमहंसधर्माननुपदिशेत्॥ ततो गुरुः शिष्यं परीक्ष्य तस्मै अधीतविद्याय पर्य

प्र०

१७ काशौचादिकारयित्वायोगपट्टंदद्यात्।योगपट्टंविनासंन्यासदानेअधिकारोनैव।तत्रपर्यंका
शौचप्रकारः।नामेभ्यागतपादाभ्यांस्वहस्तार्थंचदक्षिणेमृद्विभागंविभज्या थगरुडास
नसंस्थितः।मृत्तिकास्थापनेपिश्लोकः।पादयोश्चमृदःपंचचतस्रस्तिस्रएवच।द्वेचैकांचमृदं
दद्याज्जानुजंघादितःक्रमादिति।मृल्लेपनेसंख्यानियमोपस्थाननियमश्चोक्तः।करयोर्दशस्या
त्प्रादौद्वितीयेसप्तपंचवा।तृतीयेषट्तस्रश्चतस्रोद्वे चतुर्थकेतिपादप्रक्षालनकर्तुः
करस्तुध्यर्थमिदंवाक्यं।अथात्रप्रयोगः।पुण्यदिनेगुरुणाप्रेरितेकश्चिद्गृहस्थःशुद्धप्रदेशा
न्मृदमादायद्वेधाविभज्यएकंभागंपंचधाविभज्यवामभागेप्राक्संस्थंनिधायअपरभागं
तथैवविभज्यस्वदक्षिणभागेपूर्ववत्संस्थाप्याभयत्रशुद्धोदकमपिसंस्थाप्यस्वाग्रेपीठा
दावभ्यागतंयतिमुपवेश्यतस्यपुरतोगरुडासनेनप्राङ्मुखोदेशकालौसंकीर्त्यगुर्वनुज्ञयाऽ

भ्यागताययतयेपर्यंकाशौचंकरिष्यामीतिसंकल्प्य।पूर्वेनिहितवामभागस्थपंचमृत्पिं
डमध्येप्रथमभागेनपंचवारंमृज्जलाभ्यामभ्यागतजानुनीयुगपत्स्वदक्षिणवामकरा
भ्यांक्षालयेत्।पंचमेमृत्समाप्तिः।एवमुत्तरत्र।ततःकर्तास्वहस्तप्रक्षालनार्थंदक्षिणभागस्थ
मृत्पिंडपंचकेषुप्रथमभागस्यार्धेनस्ववामकरंदशवारंतत्रस्थेनजलेनप्रत्येकंप्रक्षाल्य।
अवशिष्टार्धेनउभयकरौसप्तवारंजलेनप्रक्षालयेत्।एवमन्येमेत्रापियोज्यं।संख्यायांविशे
षः।ततोवामभागस्थद्वितीयमृत्पिंडेनाभ्यागतस्ययुगपच्चतुर्वारंद्वेजंघेक्षालयेत्।दक्षिण
भागस्थद्वितीयमृत्पिंडार्धेनस्ववामकरंसप्तवारंप्रक्षाल्यअवशिष्टार्धेनोभौकरौपंचवा
रंक्षालयेत्।ततोवामभागस्थतृतीयमृत्पिंडेनाभ्यागतस्यगुल्फौत्रिवारंप्रक्षाल्यस्वदक्षि
णभागस्थमृत्पिंडतृतीयार्धेनस्ववामकरंषड्वारंप्रक्षाल्यावशिष्टार्धेनोभौकरौचतुर्वारं

१० ६०

१८ क्षालयेत्॥ ततो वामभागस्थचतुर्थमृत्पिंडेनाभ्यागतस्य पादपृष्ठौ द्विवारं प्रक्षाल्य दक्षिणभाग
स्थमृत्पिंडचतुर्थार्धेन स्ववामकरं चतुर्वारं प्रक्षाल्यावशिष्टार्धेनोभौ करौ द्विवारं क्षालयेत्॥ त
तो वामभागस्थावशिष्टमृत्पिंडपंचमेनाभ्यागतपादतले एकवारं प्रक्षाल्य दक्षिणभागस्थ
पंचमार्धेन स्ववामकरं द्विवारं प्रक्षाल्यावशिष्टार्धेन एकवारमुभौ करौ क्षालयेदिति॥ अथ
योगपट्टस्त॥ गुरुणा कारिते पर्यंकासने च मज्जलाभ्यां स्वयमाभ्या
गतः पीठादा वेवस्थितः कटिशौचं विधाय गुर्वनुज्ञया पादुका
भ्यां गृहं प्रव ज्य द्विगुणं कटिसूत्रं बध्वाऽन्यद्वस्त्रेणावगुंठ्याच
म्य पूर्वमेव क ल्पिते न्यासेन गुर्वनुज्ञया प्रविश्य सभ्यैः सह वे
दांते किंचिदु पन्यसेत्॥ ततो गुरुणा विधिवन्न्यासपूर्वं शंखेन १४५

५	जानु	१०	वाम	८	उभ
४	जंघा	८	वाम	५	उभ
३	गुल्फ	६	वाम	४	उभ
२	पादपृष्ठ	४	वाम	२	उभ
१	पादतल	२	वाम	१	उभ

१ शिष्यशिरसि शालिग्रामशिलां धृत्वा

शिष्यशिरस्यभिषेकं कृत्वा वस्त्रगंधमाल्यधूपदीपनानानैवेद्यैः संपूज्य स्तोत्राणि पठेत्॥ त
तो वस्त्रं चोपरि संधार्य बंधुभिर्यतिभिः सह विश्वरूपाध्यायं पश्यामि देवानित्यादि भुंक्ष्व
राज्यं समृद्धमित्यंतं पठित्वा॥ ततो गुरुणा सर्वसंमतं पूर्वमेव कल्पितं नाम दद्यात्॥ ततो गुरुः शि
ष्यं प्रत्याह॥ अद्य प्रभृति त्वया संन्यासाधिकारिणः संन्यासो देयः॥ तथा अधीतस्य दीक्षा
व्याख्या च देया योगपट्टादि चेति॥ तथा गुरून् ज्येष्ठयतीन् सदोरकं नमस्कुर्यादित्यादि संन्या
सिने गुरुणा आज्ञां कृत्वा शिष्येण शिरसा तामाज्ञां प्रतिगृह्य॥ ततो गुरुः कटिसूत्रं पंचमुद्रा
ले कृतं दंडं च तमेव स्वीयं यथासंप्रदायं शिष्यं नमस्कुर्यात्॥ अन्येपि यतयो गृहस्था यास्थ न
मस्कुर्वंति॥ शिष्यो नारायणस्य क्रीतदासनादुत्थायावासने गुरुमुपवेशयित्वा॥ शिष्याय
१८ योपदेशो जोडिका पादग्रहणादि नमस्कारान् गुरोरन्यैर्यतीनां च कुर्यादिति॥ इति संस्कार प्र
१ प्रतिष्ठानपुरवासी नारायणात्मज रुद्रदेवसूनु प्रतापनारसिंहाख्ये

प्र.

१९ कार्यो विदुषं प्रति संन्यासो ब्रह्मानंदीयपद्धत्यनुसरयौ पासनाग्निमंतं प्रति तादृशा विधुरं प्र
ति च प्रयोगः। अथाहिताग्निविषये विशेषः। तत्र श्रौताग्नयो विच्छिन्नाश्चेत्पुनराधानमिष्ट्येतं पूर्णाहु
त्यंतं वा कृत्वा प्रायश्चित्तादि कुर्यात्। विधुरोग्निहोत्री तु पूर्वमेव त्रिकांडमंडनोक्तरीत्या कृत्वा पत्न्यां स ह
पावमानेष्ट्यंतं पूर्णाहुत्यंतं वाऽधानं कृत्वा कुर्यात्। तथा भार्यायां मृतायां तया सह वह्निषु गतेषु
सोपि विधुराग्निः मंडनोक्तदिशा एकाकी पावमानेष्ट्यंतं पूर्णाहुत्यंतं वाऽधानं पूर्वमेव कृत्वा पूर्वो
क्तकाले प्रायश्चित्तं कृत्वा पर्वणि प्राजापत्यास्यात्तत्पूर्वमष्टौ श्राद्धमपि कृत्वा पुण्याहवाचनादि
सावित्रीप्रवेशांतं पूर्वोक्तरीत्या कृत्वा काले ब्रह्मान्वाधानं कुर्यात्। तत्प्रकारः। अस्तमयात्पूर्वं गा
र्हपत्यं प्रज्वाल्य दक्षिणाग्निं प्रणीयाहवनीयं विहृत्याग्नित्रयमुपसमिध्य ब्रह्माणमुपवेश्या
ज्यं संस्कृत्य स्रुक्स्रुवौ संमृज्य स्रुचि द्वादशवारं चतुर्वारं वाज्यमानीय सुसमिद्ध आहवनीये।

ॐ स्वाहा। इति पूर्णाहुतिं हुत्वा परमात्मन इदं न ममेति त्यजेत्। ततः संध्यावंदनपूर्वं कृते षेवाग्निष
ग्निहोत्रहोमः कर्तव्यः। सर्वथा होमार्थं समारोपार्थमिष्ट्यर्थं च पुनरुद्धारः। सायंहोमांते उत्तरेण गा
र्हपत्यं तृणानि संस्तीर्य द्वंद्वं पात्राण्यासादयित्वा कोपीनादिपदार्थांश्च आहवनीयदक्षिणतो द
स४ र्भेषु साधयित्वा कृष्णाजिनं वस्त्राच्छादितं चैरास्थाप्य तत्रोपविश्य यदेव एजादिना रात्रिं जागर्त्विति। त
तः प्रतिपदि ब्राह्ममुहूर्ते उत्थाय स्नानसंध्यां कृत्वा प्रातर्होमं च कृत्वा पौर्णमास्यां चेद्कृतरात्रिरा
नं कृतं तदा आदौ पौर्णमासयागः सद्यस्कालः पूर्वमेव कृत्वा ततो दर्शेष्टिमप्यपकृष्य कृत्वा वैश्वा
नरं प्राजापत्यां च कुर्यात्। तत्र वैश्वानर्याः प्राजापत्यायाः समानतंत्रः प्रयोगः। आचम्य प्राणानाय
म्य देशकालौ संकीर्त्य संन्यासस्वीकारं करिष्यमाणः कृष्णशर्माहं पूर्वांगत्वेन विहितप्राजापत्ये
ष्ट्या वैश्वानर्या समानतंत्रया यक्ष्ये। विद्युदसि। विहताए वाग्नयेभ्य इदं वागात्विदं इत्यादि पौ

प्र०
२०

णीमासंतंत्रंबर्हिराहृत्यव्रतप्रवेशाः।।समूहनादिपाणिप्रक्षालनादिप्रणीताप्रणयनांतंसमानं।
वानस्पत्यासिदक्षायंत्वेत्यादिनिर्वपणकाले।अग्नयेवैश्वानरायजुष्टंनिर्वपामि।पुरोडाशार्थो
न्।प्रजापतयेजुष्टंनि॰चरवर्थान्।विश्वेभ्योजुष्टंनि॰पुरोडाशार्थान्।अदित्यास्त्वो॰म्यग्नेवैश्वान
रहव्यंरक्षस्वप्रजापतेहव्यंरक्षस्वविश्वाहव्यंरक्षस्वेति।प्रोक्षणादिहविरासादनांतंसमा
नं।होतरेहीत्यादिपंचदशसामिधेन्यः।पंचप्रयाजाः।वार्त्रघ्नावाज्यभागौ।आज्यभागाभ्यामि
ष्ट्वा।अग्निनायज्ञश्चक्षुष्मान्।सोमेनयज्ञश्चक्षुष्मान्।प्रधानस्यामध्यात्पूर्वार्धाद्द्विरवदाय।अग्न
येवैश्वानरायानुब्रूहि।वैश्वानरायप्रतिवेदयामोयदीनृणंसंगरोदेवतासु।सएतान्पाशा
न्प्रमुचन्प्रवेदसनोमुंचातुदुरितावद्यात्।अग्निंवैश्वानरंयजाये॰हेअग्निंवैश्वानरं।वैश्वानरः
पवयान्नःपवित्रैर्यत्संगरमभिधावाम्याशां।अनाजानन्मनसायाचमानोयदत्रैनोअवतत्स्के १४७

वामीऽश्वे॰।अग्नयेवैश्वानरायेदं।अग्नेर्वैश्वानरस्याहंदेवयज्ययान्नादः।पूर्ववद्द्विरवदाय।
प्रजापतयेनुब्रूहि।प्रजापतेनत्व॰यीणो।प्रजापतिंयजाये॰हेप्रजापतिंसवेदपुत्रःपित
रंसमातरंससूनुर्भुवत्सभुवत्पुनर्मघः।सद्यामोर्णोदंतरिक्षंससुवःसविश्वाभुवोअभ
वत्सआभवाद्देवः।प्रजापतयइदं।प्रजापतेरहं॰न्नादः।पूर्ववद्द्विरवदाय।विश्वेभ्योनुब्रूहि।इदंवि
सुर्वि॰रं।विश्वेभ्योयजाये॰हेविश्वेत्रिर्देवः॰नामौवो॰विश्वेभ्यइदं।विश्वेषामहं॰नादः।नोरिष्ठान्नु
त्वा।आज्याहुतीर्जुहोति।वैश्वानरोनऊत्याप्रयातुपरावतः।अग्निरुक्थेनवाहसास्वाहा।।अ
ग्नयेवैश्वानरायेदंनमम।इतिसर्वत्रत्यागः।।ऋतावानंवैश्वानरमृतस्यज्योतिषस्पतिं।अज
स्रंघर्ममीमहेस्वाहा।।२वैश्वानरस्यदंसनाभ्योबृहदरिणादेकःस्वपस्ययाकविः।उभापित
रामहयंनजायताग्निर्द्यावापृथिवीभूरिरेतसास्वाहा।।३पृष्टोदिविपृष्टोअग्निःपृथिव्यांपृ

मार्जनं कुर्यात्॥ नात्र चतुर्धाकरणं॥ चतुर्धाकरणे कृते दर्विः शेषस्याग्रेणाग्निं दर्भस्तंबेषु कृतशेषं निधायेति विधिबलात्
केचिदेवं वर्णयंति॥ न एकदेवताग्नेयविकाराः इति सूत्रात् वैश्वानरप्राजापत्यविष्णुदेवताकहविस्त्रये आग्नेयत्वे सिद्धे॥ आग्ने
यं चतुर्धाकरोति विधिनियमादग्रेणाग्निं दर्भस्तंबेषु कृतशेषनिधानविधिवशाच्चेत्थं प्रयोगः कर्तव्यः॥ यद्वेधा विनज्य भागे

प्र०
२१ शोचिष्मानोषधीराविवेश। वैश्वानरः सहसा पृष्टो अग्निः। सनो दिवा सरिषः पातु नक्तं स्वाहा॥४॥ जातो
यदग्ने भुवना व्यख्यः पशुं न गोपा इर्यः परिज्मा। वैश्वानर ब्रह्मणे विंद गातुं यूयं पात स्वस्तिभिः
सदा नः स्वाहा॥५॥ त्वमग्ने शोचिषा शोशुचान आरोदसी अपृणा जायमानः। त्वं देवां अभिश
स्तेरमुंचो वैश्वानर जातवेदो महित्वा स्वाहा॥६॥ अस्माकमग्ने मघवत्सु धारयानामि क्षत्रमज
रं सुवीर्यं। वयं जयेम शतिनं सहस्रिणं वैश्वानर वाजमग्ने तवोतिभिः स्वाहा॥७॥ वैश्वानर
स्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः। इतो जातो विश्वमिदं विचष्टे वैश्वानरो यतते
सूर्येण स्वाहा॥८॥ अथैनमुपतिष्ठते। सहस्रशीर्षस्य द्वादशाभिर्ऋग्भिः। अग्नये स्विष्टकृते
स्वाहा। पिप्रीहि देवां॰ द्वौ। अग्निं स्विष्टकृतं यजा येहग्निं स्वि॰ लग्ने वैश्वानरस्य॰ इ प्रजा
पते प्रि॰ इ विष्णोः प्रियाधा॰ इ देवानां॰ वो॰ इडा प्राशनं चतुर्धाकरणं धेनुर्दक्षिणा॥ सहस्र
केन चतुर्धाकरणं विधायावशिष्टं भागं पात्र्यामेव संस्थाप्य कालद् दर्भस्तंबे तं भागं निदधायात्॥ एवं कृते उभयसिद्धिर्भवतीति
नव्याः॥ प्रकृतमनुसरामः॥१

धारोत्साक्षीयमाणा इत्यादितया धेन्वातितराणि मस्कोः। हविःशेषो नुद्दास्य। अग्नेरग्रे दर्भस्तंबे
यजमानभागं निदधाति। अनुयाजादि सर्वं समानं इष्टिं समाप्य। सर्वो वै रुद्रः पुरुषो वै नमः।
विश्वं भूतं भुवः सर्वो विष अस्तु। इति द्वाभ्यामुपस्थायाग्निं। आयुर्दा अग्ने हविषो जुषाणो घृत
प्रतीको घृतयोनिरेधि। घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभिरक्षतादिमं। इति मंत्रेण दर्भ
स्तंबस्थाहुतशेषादुपादाय प्रक्षाल्य सहस्रशीर्षा पुरुष इत्यनुवाकेन प्राश्याचम्य आत्मानं
प्रत्यभिमृश्य। ओमिति ब्रह्म। ओमितीदं सर्वं। ओमित्येतदनुकृतिर्ह स्म वा अप्यो श्रावयेत्य
त्याश्रावयंति। ओमिति सामानि गायंति। ओं शोमिति शस्त्राणि शंसंति। ओमित्यध्वर्युः प्र
तिगरं प्रतिगृणाति। ओमिति ब्रह्मा प्रसौति। ओमित्यग्निहोत्रमनुजानाति। ओमिति ब्राह्म
णः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीति। ब्रह्मैवोपाप्नोति। इत्यनुवाकेनाग्नि द्रव्यमग्नौ प्रक्षिप्य

प्र

२२ मन्यग्नीन्समारोपयेत्। अस्यामिष्टौ मूलभूता श्रुतिः। आग्नेयीमेव कुर्यादग्नये वैश्वानराय
द्वादशकपालं पुरोडाशं निर्वपति प्राजापत्यं चरुं वैसर्वं नवकपालं चेति। अथवा केवलप्राजाप
त्येष्टिः कर्तव्या। तत्पक्षे प्राजापत्यश्चरुः। पंचदश सामिधेन्यः। प्रजापतिरुपांशु। आवाहने प्रजा
पतिं आवह। पंच प्रयाजाः। वृधन्वंतावाज्यभागौ। चरुसान्नाय्यालाभे इति। सान्नाय्यप्रतिनि
धित्वेन चरोर्देशे धर्मप्रयोग्यतात्। प्रजापतये अनुब्रूहि। सुभूः स्वयंभूः प्रथमः मंतर्महत्य
र्णवे। दधे ह गर्भमृत्वियं यतो जातः प्रजापतिः। ॐ प्रजापतिं यज। भूर्भुवः स्वर्नरो यं ३ हे प्रजा
पतिं प्रजापते नत्व· यो णो वौ· प्रकृतिवत्स्विष्टकृत्। उपहोमादिकं पूर्ववत्। सर्ववेदसदक्षि
णा। अनूयाजादि सर्वं समानं। ब्राह्मणतर्पणांतामिष्टिं समाप्य। अन्यत्सर्वं पूर्वेष्टिवत्। अ
न१ थवा वैकल्पिकेनैव त्रैधातवी। तत्प्रयोगस्तु ब्रह्मानंदपद्धतावगंतव्यः। अथ बोधायनानुसा १४९

रीवैश्वानरेष्टिप्रयोगः। देशकालौ संकीर्त्य संन्यासांगवैश्वानरेष्ट्यधिकारार्थं पवनमंत्राचम
नमंत्रप्रोक्षणपुण्याहवाचनानि करिष्य इति संकल्प्य। ऋत्विजोपि संन्यासांगवैश्वानरेष्ट्या
र्त्विज्याधिकारार्थं पवनमंत्राचमनमंत्रप्रोक्षणानि करिष्य इति संकल्प्य। यथाधिकारं तानि
कृत्वा यजमानो विहारं प्रविश्य गार्हपत्यस्य पश्चात्प्रागग्रेषु दर्भेषूपविश्य पवित्रपाणिः प्राङ्
मुखः प्राणानायम्य जपति। याः पुरस्तात्प्रस्रवंति· रक्षो देवा गातु· ज्यतां। भद्रं एहि। सखे नत्वा
कृयामि। आकूत्यै त्वा कामाय· निविष्टमित्यं तं जुपिताम्। परमेश्वरप्रीत्यर्थं संन्यासस्वीकारं
करिष्यमाणः अहं शर्माहं पूर्वांगत्वेन विहितवैश्वानरेष्ट्या यक्ष्ये त्रिरुक्त्वैवं वदेत्। ततस्तन्मे समृ इति
ध्यतामित्याद्यैः ऋत्विग्भिः तत्समृध्यतामित्याद्युक्ते वदेत्। ॐ तथा वैश्वानरेष्टिसंबंधिं हविर्व्री
३३ हिमयः पुरोडाशद्रव्यं पंच प्रयाजाः। अग्नीषोमौ वाज्यभागदेवते प्रधानदेवता अग्निर्वैश्वा

प्र·

२३ नरोद्वादशकपालः पुरोडाशः अग्निः स्विष्टकृदित्यादयो गृदेवताः। त्रयोनुयाजाः। सप्तपत्नीसंयाजाः
प्रधानदेवताउच्चैः। पत्नीसंयाजानामंद्रस्वरेण एवमात्मकेन सांगेनकर्मणास्ययायक्ष्ये। कृतेऽ
वत्ता अर्हेयित्वा अध्वर्युः इडाजपं कृत्वा नाधायबर्हिराहृत्य पंचदशसामिधेन्यः। यजमानः
व्रतग्रहणांते अध्वर्युगार्हपत्येस्मात्तेवदाज्यंसंस्कृत्य स्रुक्स्रुवंनिष्टप्य संमृज्य स्रुचि चतु
र्गृहीतं गृहीत्वा आहवनीये समिधमाधाय पर्युक्ष्य यजमानेनान्वारब्धः। पृथिवी होता। द्यौर·
इंद्रियायेति मनसा तूष्णीं जुहुयात्स्वाहेति जुहोति। वाचस्पतये ब्र· अ· स्रुवेणयदेवाय दीव्यमा
युष्टे इति त्रिभिरनुवाकैः प्रस्तरं जुहुयात्। ततो यजमानः समित्पाणिस्तिष्ठन् वैश्वानरायेत्य
पस्थाय नरदानां तं कुर्यात्। अ· चतुर्गृहीतं गृहीत्वा। पूर्णा पश्चादुत· इयंतो। अग्नीषोमो· ये
छतं स्वाहेति जुहुयात्। य· पौर्णमास्यायेदं। निवेशनी संगम· संविशाना। यत्ते देवा अद· सु

वीरं स्वाहेति जुहुयात्। य· आमावास्यायाइदं। ततः पाणिसंमर्शनादि। पात्रासादनेद्वादशकपा
लान्युवशिष्टानि प्रकृतिवत्। निर्वपणे देवस्यत्वा· अग्नये वैश्वानराय जुष्टं नि· देवस्यत्वा· अ
ग्नये वैश्वानराय वो जुष्टं प्रो· प्रोक्ष्य। अग्नये वैश्वानराय जुष्टमधिवपामीत्यधिवापो द्वाद
शकपालान्युपधाय। अग्नये वैश्वानराय त्वा इत्यभिमर्शनो। आप्यायतां घृत· अग्नये वैश्वा
नराय जुष्टमभिघारयामि। होतरेहीत्यादि। आज्यभागाविष्ट्वा। अग्नये वैश्वानरायानुब्रूहि
होता। वैश्वानराय प्रतिवे· इक्यां३। अग्निं वैश्वानरं यज्ञ। ये· हे अग्निं वैश्वानरं वैश्वानर· पव
यान्नः प· स्तुवामी३ वौ३ अग्नये वैश्वानरायेदं। अग्ने वैश्वानरस्याहं देवयज्ययान्नादो। स्विष्ट भूयासं
कृतमवदाय स्रुवेणाज्यस्थाल्या आज्यमन्याहुतिं गृहीत्वा प्रस्तरं मध्ये वाज्याहुती रूपं जुहोति
वैश्वानरो न ऊत्या· वाह साः स्वाहा। अग्नये वैश्वानरायेदमिति सर्वत्र त्यागः। कृतौ वानवै· महे स्वा

प्र॰
२४ हा॥२॥वैश्वानरस्य रूपं रेतसा स्वाहा॥३॥पृष्टो दिवि॰नक्तं स्वाहा॥४॥जातो यदग्ने॰स दानः स्वाहा॥५॥
त्वमग्ने शोचिषा॰महित्वा स्वाहा॥६॥अस्माकमग्ने॰तृभिः स्वाहा॥७॥वैश्वानरस्य सुम॰सूर्येण स्वाहा
॥८॥अथैनमुपतिष्ठते॥सहस्रशीर्षेत्यष्टाभिर्ऋग्भिः॥ततोध्वर्युस्स्रुवेण ध्रुवाज्यं हुत्वा प्रत्या
क्रम्य ओ श्रावय॥अग्निं स्विष्टकृतं यजेत्यादि होता प्रेक्षतो संयाज्ये इलोपाह्वाने॥चतुर्धाकरणका
लेनान्वचतुर्धाकरणं॥आहवनीयाग्रे दर्भस्तंबेषु हुतशेषनिधानबलादेव हेतोश्चतुर्धाकरण
निवृत्तिः॥इडाप्राशनादि॥दक्षिणाकाले अन्वाहार्यं धेनुं वा साद्य॥ऋत्विजः अयं व ओदनो धे
नुं च यथाभागं प्रतिगृह्णीध्वं॥ऋत्विजः देवस्य त्वा॰प्रतिगृह्णामि देवि दक्षिणे ब्रह्मणओदनं रु
द्राय गां ताभ्याममृतत्वमश्यां॥उद्वासयंत्येतद्धविःशिष्टं अघेनेनस्क चउदगन्वाहार्यं च॥एतस्मि
काले हविःशेषमाहवनीयस्याग्रे दर्भस्तंबेषु निदधाति॥ब्रह्मन्प्रस्थास्यामः इत्यादि सर्वं समा १५१

नं॥इष्टिं समाप्य सर्वो वै रुद्र॰विश्वं भूतमिति द्वाभ्यामुपस्थायाग्निं॥आयुर्दा अग्ने॰रक्षतादि
मं॥इति मंत्रेण दर्भस्तंबस्थाद्धुतशेषात्किंचिदादाय प्रक्षाल्य सहस्रशीर्षेत्यनुवाकेन प्रा
श्याचम्य आत्मानं प्रत्यभिमृश्य॥आपस्तंबतंत्रानुसारी वैश्वानरेष्टिः॥लिखितओमिति
ब्रह्मेत्यनुवाकेन दर्भस्तंबस्थहुतशेषमाहवनीये प्रक्षिप्यात्मन्यग्नीन्समारोपयेदि
ति वैश्वानरेष्टिः॥अथ प्राजापत्या पूर्ववत्त्रिरूपा पशुत्रिरूपैः प्राजापत्येष्ट्या यक्ष्य इति
संकल्प्य॥प्राजापत्येष्टिसंबंधिहविः अग्नीषोमावित्यादि प्राजापत्यो व्रीहिमयश्चरुः
उपांशु स्विष्टकृदादयो गदेवता इत्यादि॥प्रकृतिवदिध्माबर्हिषी आहृत्य व्रतग्रहणांते
अध्वर्युः पूर्ववदाज्यं संस्कृत्य चतुर्होता कुर्यात् सारस्वतहोमौ हुत्वा पाणिसंमर्शनादि पा
२४ त्रासादने स्फ्यः चरुस्थाली धृष्टिः सह चरुमेक्षणमिति शम्या दृषदुपलवर्जमितराणि

प्र॰

२५ प्रकृतिवत्॥ निर्वपेद्देवस्य॰ प्रजापतयेजुष्टंनि॰ प्रजापतयेवोजुष्टंप्रो॰ कालेऽदितिवयजंचरुहेतुं
गारंनिधायतंडुलपरिस्तिरः पवित्रमानीतप्रणीतोदकंचरुस्थाल्यांध्रुवासीत्यधिश्रित्यएनामंगा
रैःपरिचिनोतिनिर्दग्धंरक्षइति॥ अभिमर्शनेप्रजापतयेवः॥ घर्मोऽस्त्वविश्वायुपः इतितंडुला
नावपति॥ आप्यायतांघृत॰ तेजसाप्रजापतयेजुष्टमभि॰ उद्वासयतिश्चतउत्स्नाति॰ नो॥ आ
ज्येनसंतर्पयति॥ आईः प्रथस्वपृथुनेन॰ प्रजापतयेउपांशु॥ अनुब्रूहीत्युक्त्वा॥ होतासुभूः स्वयं
भूः॰पतिः अं इत्युक्त्वा॥ प्रजापतिंउ॰ यजेत्युक्त्वा प्रजापतेनत्व॰ रयीणां॰ वौ उक्त्वा प्रजापत
यइदंन॥ प्रजापतेरहंदेवयज्ययाप्रजननयाचपशुभिश्चजनिषीय॥ प्रकृतिवत्स्विष्टकृत्॥ स्वि
ष्टकृद्यागेचरुमेक्षणमग्नावनुप्रहृत्यआज्यशेषेणाभिघारयति॥ अन्वाहार्यमासाद्यसार्ववे
दसदक्षिणार्थंयथाशक्तिहिरण्यंचनिधायब्रह्मणओदनं॥ अग्नयेहिरण्यंताभ्याम्तत्त्वम

स्याभिस्याशिउद्वासयंत्येतद्धविःशेषमाहवनीयस्याग्नेर्दर्भस्तंबेषुनिधाय॥ ब्रह्मन्प्रस्थास्या
मइत्याशिउज्ज्ञितिवाचंने प्रजापतेरहमुज्जितिमन्त्रशेषंइत्याशीर्भिःसमाप्यसर्वोवैविश्वंभृ
तमितिद्वाभ्यामग्निमार्जनहविःशेषभक्षणांतंपूर्ववत्॥ अग्निद्रव्यमग्नौप्रक्षेपांतंच॥ इतिप्राजा
पत्येष्टिः॥ एवंप्राजापत्यायन्यतमामिष्टिंकृत्वा॥ अर्धाधानेनाऔपासनाग्नौसर्वाधानेनादक्षि
णाग्नौप्राणादिमंत्रहोमपूर्वकंविरजाहोमंपुरुषसूक्तहोमंच॥ अनाहिताग्निप्रसंगेलिखितप
कारेणतदंगदक्षिणादानांतंकृत्वा॥ अर्धाधानेनऔपासनाग्नेःसंमासिंचंलिखितप्रकारेणा
कुर्यात्॥ संमासिंचंतु॰ आयुष्मंतंकरोतुमामित्युपस्थायसर्वाधान्येसर्वाधानीवाअरण्यांनि
पात्राण्यप्सुप्रक्षिप्यतेजसानिगुरवेदद्यात्॥ अस्माद्वैत्वमजायथा॥ अयंत्वदधिजायतामसौ
५८ स्वर्गायलोकायस्वाहा॥ इतिमंत्रेणाहवनीयेअरणीमुसलोलूखलव्यातिरिक्तसर्वाणिपा

प्र०
२९ ग्णिदहेत्। ततः समारोपः। आदौ सम्यक्कृतहस्तं प्रताप्य। अयं ते योनिर्ऋ० यथाः तं जानन्न गन् आ० गिरः
यातेअग्ने य० एहि। इति मन्त्रद्वयं त्रिः पठित्वा अयं ते आत्मनो मुखमध्ये उष्मा यथा गच्छति तथा आ
हवनीयाग्निं समारोपयेत्। अग्निज्वालां प्राणीमदिति ब्रह्मानं दीपेत्। ततः स्वर्गाख्यं विश्वतो
मुखं वैश्वानरं ध्यात्वा। अयमग्निर्गृहपतिर्गार्हपत्यः प्रजया वसुवित्तमः। अग्ने गृहपते अभिद्यु
म्नमभिसह आयच्छस्व स्वाहेति मन्त्रेण गार्हपत्यसंज्ञं अरणीं प्रक्षिप्य। अयं ते योनिर्ऋ० तेन
ति मन्त्रद्वयं त्रिः पठित्वा पूर्ववद्गार्हपत्यं समारोप्य भूः संज्ञं विश्वतो मुखं वैश्वानरं ध्यात्वा।
अयमग्निः पुरीष्यो रयिमान्पुष्टिवर्धनः। अग्ने पुरीष्याभिद्युम्नमभिसह आयच्छ
स्व स्वाहेति मन्त्रेण दक्षिणाग्नौ मुसलोलूखले हुत्वा पूर्ववन्मन्त्रद्वयं त्रिरावर्त्तनेनोक्तवद्द
क्षिणाग्निं समारोप्य। अन्तरिक्षाख्यमव्ययं वैश्वानरं ध्यायेत्। ततो गार्हपत्यसंगत्वापो १५२

रूपं जपस्वा वेद्यां मध्ये स्थित्वा। कौशिको नाम कस्मै त्वा काय त्वे ति यजुर्जप्त्वा अर्धधानी पुनरौपा
सनो तिक्रमाग्नस्य पात्र दाहं कृत्वा उक्तमन्त्राभ्यां मुक्तवत्समारोप्य हस्तौ प्रक्षाल्याचम्य। ॐ ए
२।२।१२ ह्यग्ने सहेष्टा पूर्तेन्नु संवरस्व। नाहं त्वामपहाय परा गां मा त्वं मामपहाय परागाः। इति मन्त्रे
णौपासनाग्निं विसृज्य पुनराहवनीयदेशं गत्वा। अद्य संभवहेत्यादि स्थलमुपतिष्ठेत्। ततः
कौपीनकटिसूत्रवस्त्रकंथादंडाजिनमुपयोगि विसाडुका पिटहोत्वा संन्यासिनाभावा
रात्कुमंडलुरपि गृहीत्वा कृष्णाजिनं वादायोत्तरेनारायणेन गृहान्निष्क्रम्य जलाशयं गत्वा
स्वेष्टपक्षपुत्रेष्वाशिषं दत्वे स्यादि गुरूपसदनान्तं पूर्ववल्लिखितात् नाहिताग्निः प्रयोगवत्सर्वं
कुर्यात्। इति त्रेताग्निकल्पैकं प्रतिप्रयोगः॥ ॥ ॥ इदानीं केवलस्नातकस्य निरग्निकं प्रतिग्र
५धा१ ह्मानां वा न विरजाहोमादि वर्जित प्रामः कपिलप्रोक्तप्रयोगोऽस्मते। निरग्निकः कर्त्ता उक्तक्र

२७ देउक्तप्रकारेण प्रायश्चित्तं कृत्वाऽष्टौ श्राद्धान्यपि कृत्वा तद्दिने दिनांते रवामुंडनं विधाय दंडसंस्कार
मपि विधाय पुण्याहादित्रयं कृत्वा ब्रह्मांजलिं विधाय ब्रह्मणे नमः इत्यादिमंत्राणां मानसज
पादि त्रिवृत्प्राशनांतं कृत्वोपवाससंकल्प्य। सावित्रीप्रवेशोक्तं कृत्वा सायंसंध्यामुपास्य कौ
पीनाद्युपयुक्तपदार्थसन्निधानं कृत्वा विष्णुमभ्यर्च्योपवासी ब्रह्मभावेन स्थितः सन्नेतां
रात्रिं जागर्तीति। ततः प्रा तः स्नात्वा यस्मात्वां प्रातःसंध्यावंदनांते कौपीनादिपदार्थयुक्तो
नद्यादौ गत्वा देव र्षिपितृतर्पणं च कृत्वा बंधुविसर्जनाद्यभयदानांतं कृत्वा पालिकां वि
डूंधकं कर्मेत्यादि प्रैषपठनपूर्वकं तदुक्तपदार्थत्यागानंतरं सुदूदिशावलोकनमादित्य
चंद्रावनिलह्यादि प्रार्थनादि प्रैषोच्चारणांतं कृत्वा ऽभयं सर्वभूतेभ्य इति पुनरभयंद
त्वा शिखार्थरक्षितकेशोत्पाटनादि दंडकमंडलुग्रहणांतं कृत्वा दंडादियुक्तः समित्पा

णिर्गुरुसमीपमागत्य तत्प्रार्थनां कृत्वा तदुक्तं दक्षिणजानुभूमौ निधानादि अधीहि भगवो ब्र
ह्मेति प्रैषवाक्यपठनांते गुरुमुखात्प्रणवोपदेशसंपादनादि तदर्थसंपादनार्थं सर्वमाचार्य
मुखेनैव पर्वीकृत पंचमहाभूतेत्यादिना स्वशाखावाक्योपदेशपूर्वकं कुर्यात्। इति केवलनि
रग्निकं प्रतिप्रायः कपिलप्रोक्तप्रयोगः॥ ॥अथातुरसंन्यासो निरूप्यते। संन्यासे सर्वत्र स्व
शरीरव्यतिरिक्तं सर्वं त्यजन् संन्यासाश्रमं गमिष्यामीति संकल्प्य प्रैषोच्चारणाभयप्रदाना
नीति त्रितयं प्रधानं। अन्यो नांदीमुखादिदंडग्रहणांतः क्रमकलापो ऽस्त्येवांग। अत एवातुरसं
न्यासे संकल्पप्रैषोक्त्यभयप्रदानात्फलं श्रूयते। यद्यातुरः स्यात्मनसा वाचा वा संन्यसेदे
षपूर्याब्रह्मणाह्यनुवित्तस्तेनेति संन्यासी ब्रह्मविदेकमेवेति भगवन्निति। आतुराणां तु सं
न्यासेन विधिर्नैव च क्रिया। प्रैषमात्रं समुच्चार्य संन्यासं तत्र पूरयेदिति। प्रैषमात्रं कर्मत्रितय

प्र० २८ मितिपावत्।आंगिरसोक्तप्रकारेण।प्रक्षालितपाणिः शुद्धवस्त्रं संधार्य मंत्रस्नानं कृत्वा निरति
शयानंदावाप्तये परमहंसाश्रमाधिकारसिद्ध्यर्थमातुरविधिना संन्यासमहं करिष्य इति सं
कल्प्य ब्राह्मणानुज्ञया शिखायां पंच सप्त वा केशान् स्थापयित्वा शिष्टान् केशश्मश्रून् खादीन् वा
पयेत्।ततः स्नात्वा संध्यातर्पणादिकं कृत्वोपासनं कृत्वा ऽन्यग्निं समारोप्य।आहिताग्नि
श्चेत्प्राजापत्येष्टिस्थाने पूर्णाहुतिं हुत्वा श्रौताग्निं समारोप्य संन्यसेत्।विधुरब्रह्मचारीस्ना २५
६२ तकानामग्नेरभावादारोपो नास्ति।उत्पन्नाग्न्यनुगताग्नीनामाधानकाले संभवात् समारो
पो नास्ति।संभवे तु कर्तव्यमेव।ततो ऽपां समीपं गत्वा ऽप उद्धृत्य पात्रे कृत्वा तोयमादाय प्राजु
होति।एष ह्वा अग्नेर्योनिर्यः प्राणः प्राणं गच्छ स्वां योनिं गच्छ स्वाहेति प्रथमाहुतिः।आपो वै
सर्वा देवताः सर्वाभ्यो देवताभ्यो जुहोमि स्वाहेति द्वितीयाहुतिः।ततः पात्रस्थं हुतशेषं १५५